वर्षम् - ०१ अङ्कः - ०१
जनवरी-दिसम्बर, २०१९
शोधज्योतिः
ISSN-2350-0700

# वास्तुशास्त्रानुसारं वाटिकानिर्माणविधानम्

**डॉ. हेमुबेन महेश राठौड***

## प्रास्ताविकम्

वास्तुशास्त्रं प्रचीनतमं शास्त्रं वर्तते। भारतीयवास्तुकला प्राचीनतमा महत्त्वपूर्णा कला चास्ति। वास्तोः सर्वव्यापकं विज्ञानं वर्तते। वस्तुतस्त्वस्य वास्तुशास्त्रस्य सर्वतो व्यापकदृष्टिकोणो वर्तते। यथास्य शास्त्रस्य महत्त्वं सामाजिकरीत्या मनोवैज्ञानिकरीत्या दृश्यते। मनुष्याणां सहचराः पशवः वनस्पतयश्च सदैव मन्यन्ते। तैर्विना मानवजीवनमसम्भाव्यम्। मानवजीवने वृक्षाणां लतापत्रादीनां महत्त्वमधिकमस्ति।

केषुचिदपि ग्रामेषु नगरेषु वा मानवानां स्वास्थ्यलाभाय एवं नगर-ग्रामाणाम् सुशोभनार्थँ ग्रामेषु नगरेषु वाटिकायाः महत्त्वं विशेषमस्ति। प्रायः वास्तुशास्त्रीयेषु ग्रन्थेषु नगरनिर्माणप्रसङ्गे वाटिकायाः निर्माणस्य महत्त्वं निर्माणविधानवर्णनं च विस्तारपूर्वकं विद्यते। समराङ्गणसूत्रधारग्रन्थस्य प्रणेता राजाभोजः. उद्यानस्य, जलोद्यानस्य, जलवेश्मस्य च क्रीडागारस्य व्याख्यां श्लोकद्वये दर्शयति। यथा –

**क्रीडागृहं यदारामे तदुद्यानं प्रचक्षते।**
**तीरेऽम्भसो जलोद्यानं जलवेश्माम्बुमध्यगम्।**

**क्रीडागृहं यदत्रोक्तं क्रीडागारं तदुच्यते।**
**विहारभूमिराक्रीडाभूमिरित्यभिधीयते॥**[१]

मानवजीवने अनुरञ्जनस्य महत्त्वमपि वर्तते। यथा मानवानां मनोरञ्जनार्थमपि नगरे सार्वजनिकवाटिकायाः एवं राजप्रासादे अपि राजपरिवारजनानां मनोरञ्जनार्थं राजवाटिकायाः निर्माणमावश्यकरूपेण करणीयमिति मन्यन्ते।

## वाटिकानिर्माणवधानम्

* संस्कृतप्राध्यापिका, एन. एस. पटेल आर्टस् महाविद्यालयः, आणन्द (गुजरातम्)

[१] समराङ्गणसूत्रधारः, (जुगनू), अ.१८.५४-५६

राजवल्ल्भग्रन्थे राजप्रासादस्य वामे वा दक्षिणे राज्ञां मनोरञ्जनार्थं वाटिकानिर्माणं कारयेत् इति सूत्रधारमण्डनः निर्देशयति। यथा हि -

**वामे भागे दक्षिणे वा नृपाणां त्रेधा कार्या वाटिका क्रीडनार्थम्।**
**एकद्वित्रिर्दण्डसंख्या शतं स्यान्मध्ये धारामण्डपं तोययन्त्रैः॥**[२]

कनिष्ठा वाटिकायाः प्रमाणं शतं (१००) दण्डमानेन भवेत्। मध्यमा वाटिका द्विशतं (२००) दण्डमानेन भवेत् तथा त्रिशतं दण्डमानेन वाटिका उत्तमावाटिका विख्याता। तन्मध्ये धारामण्डपं तोययन्त्रं च अपि स्थापनीयम्। वाटिकायां जलयन्त्रनिर्माणं निम्नदर्शितरूपेण करणीयम्। यथा हि -

**क्षेत्रां सप्त विभागा भाजितमतो भद्रं च भागत्रयं**
**तन्मध्ये जलवापिका जिनपदैरेकांशतो वेदिका।**
**स्तम्भैर्द्वादशभिश्च मध्यरचितः कोणेषु कूपान्वितः**
**कर्तव्यो जलयन्त्र एष विधिवत् भोगाय पृथ्वीभुजाम्॥**[३]

वाटिकायां जलवापिका निर्माण हेतु क्षेत्रस्य सप्त- सप्त विभागाः चतुर्दिक्षु करणीया। तेषां त्रिभागेन भद्रं स्थापनीयम्। तन्मध्ये २४ (चतुर्विंशंति) पदोपरि जलवापिकायाः निर्माणं करणीयम्। तदनन्तरं तन्मध्ये भागैकेन वेदिका स्थाप्या। केन्द्रभागे द्वादश (१२) स्तम्भयुक्तं तोयमण्डपं प्रकल्पयेत्। यथोक्तवर्णनम् अपराजितपृच्छायामपि प्राप्यते। समराङ्गणसूत्रधारग्रन्थे राजा भोजः धारागृहस्य स्वरूपं निर्दिशति। यथा -

**स्तम्भशीर्षकरूपाणि काष्ठमूलाश्रितानि च।**
**सुषिराणि प्रयत्नेन काष्ठनाडीमुखान्तरैः॥**[४]
**कृतसूक्ष्मान्तरच्छिद्रैः प्रवर्षति समन्ततः।**
**तद् धारागृहमित्युक्तं धारागारादिनामभृत्॥**[५]

राजवल्लभग्रन्थे वाटिकायां केषां केषां वृक्षाणां वपनं करणीयमिति विस्तृतरूपेण वर्णितं दृश्यते। यथा - वाटिकायां चम्पकः, कुन्दकः, निर्वालिका, सुमनोविल्लासिजातिः, हेमकेतकी, श्वेतपाटलगुलाबादीनां रोपणं करणीयम्। तत्र नारंङ्गः, कर्षिकारः, वसन्ततिलका, रक्तपुष्पादयाः,

---

[२] राजवल्लभवास्तुशात्रम् (जुगनू) अ.९.१८

[३] राजवल्लभवास्तुशात्रम् (जुगनू) अ.९.१९

[४] समराङ्गणसूत्रधारः, (जुगनू) अ.१८.४८

[५] समराङ्गणसूत्रधारः, (जुगनू) अ.१८.५०

जम्बीरो, बदरी, पूगिफलम्, मधुपाजम्बूश्च आम्रवृक्षः, वटः, अश्वत्थतथ्याशिवा, चिञ्चाऽशोककदम्बः, निम्बः, खर्जूरिका, दडिमी, कर्पूरः, अगरूः, हयरिपुः, पुन्नागः, नागलता, बीजनिभृता(नीम्बू)-आदि वृक्षाणां वपनं करणीयम्। एतत्प्रकारेण वाटिकायां द्राक्षा, बकुला शतपत्रिका, धत्तूर, कङ्कोलक, शाल, ताल, तमाल, अगस्तिया, मन्दारः, पारिजातः च अन्ये भोगप्रदायकाः विचित्रखाद्यसुफलास्ते वृक्षाः रोपणीया इति सूत्रधारमण्डनः दर्शयति।

वाटिकायां आस्थानमण्डपघटीयन्त्रश्चापि स्थापनीयम्। यथा हि -

**आस्थानं प्रतिषेचनाय च घटियन्त्रं सुसारो भवेत्**
**दोलः स्त्रीजनखेलनाय रूचिरं वर्षावसन्तोत्सवे।**
**बालाप्रौढवधूसुमध्यवनितागानैर्मनोहारिभिः**
**ग्रीष्मेशारदकेथशीतलजलक्रीडाशुभे मण्डपे॥**[६]

आस्थानमण्डपस्य वनस्पतीनां सेचनार्थं वाटिकायां तत्र घटीयन्त्रस्य स्थापना करणीया। सारवृक्षस्य काष्ठेन घटीयन्त्रस्य निर्माणं करणीयम्। तत्र स्त्रीणां वसन्तोत्सवे अनुरञ्जनार्थं दोला निर्माणमपि कार्यम्। ग्रीष्मे - शरदि शीतलजलक्रीडा हेतुः मण्डपे जलोद्यानस्य प्रबन्धमपि प्रकल्पयेत्।

## वाटिकायां ग्राह्याग्राह्यवृक्षाः

गृहे, देवालये, राजाप्रसादे च उद्याने निरूपिताः वृक्षाः राजवल्लभग्रन्थानुसारं निम्नदर्शितलक्षणयुक्ताः वृक्षाः अशुभवृक्षाः भवन्ति। यथा –

**वृक्षाः क्षीरसकण्टकाश्च फलिनस्त्याज्या गृहाद्दूरतः**
**शस्ते चम्पकपाटले च कदली जातिः तथा केतकी।**[७]

अर्थात् गृहदेवालयश्च उद्यानसमीपे सदुग्धाः, सकण्टकाः, फलिनाः, वृक्षाः न रोपयेत्। परन्तु गृहाद्दूरतः रोपयितुं शक्यते। चम्पकः पाटलः, कदली, जातिः(जूई) तथा केतकी इत्यादीनां वृक्षाणां रोपनं प्रशस्तं मन्यते। अप्रशस्त्वृक्षाणामशुभं फलं प्राप्यते। यथा –

**सदुग्धावृक्षा द्रविणस्य नाशं कुर्वन्ति ते कण्टकिनोऽभीतिम्।**
**प्रजाविनाशं फलिनः समीपे गृहस्य वर्ज्याः कलधौतपुष्पाः॥**[८]

---

[६] राजावल्लभवास्तुशास्त्रम् (जुगनू) अ.९.२३

[७] राजावल्लभवास्तुशास्त्रम् (जुगनू) अ.१.२८

[८] राजावल्लभवास्तुशास्त्रम् (जुगनू) अ.१.२९

अर्थात सूत्रधारमण्ड्नस्य मतानुसारं सदुग्धावृक्षाणां फलं धननाशः, सकण्टकवृक्षाणां फलं शत्रुभयं तथा फलिनवृक्षाणां फलं संततिनाशः भवति तथा सुवर्णवर्णपुष्पाः अपि गृहसमीपे अशुभाः भवन्ति।

बृहत्संहिताग्रन्थेऽपि एतावतां शुभाशुभवृक्षाणां वपनविषयकं वर्णनं प्राप्यते। यथा -

**आसन्ना कण्टकिनो रिपुभयदाःक्षीरिणोऽर्थनाशाय।**
**फलिनः प्रजाक्षयकरा दारूण्यपि वर्जयेदेषाम्।।**
**छिन्द्याद्यदि न तरुस्तान् तदन्तरे पूजितान् वपेदन्यान्।**
**पुन्नागाशोककारिष्टबकुलपनसान् शमीसालौ।**[९]

वराहमिहिराचार्यस्य मतानुसारं कण्टकयुक्ता वृक्षाः गृहसमीपे रिपुभयदाः भवन्ति, सदुग्धा वृक्षाः धननाशकाः भवन्ति, फलिनाः वृक्षाः सन्ततिहानिकारकाः भवन्ति। सदुग्धावृक्षाणां तथा सकण्टकवृक्षाणां काष्ठमपि गृहनिर्माणे वर्जयेत्। एतेषां वृक्षाणां काष्ठमपि दोषकारकं भवन्ति। एताः वृक्षाः गृहसमीपे न वापयेत्। यदा एते वृक्षाः गृहसमीपे पूर्वस्मिन् स्यात् तदा तन्मध्ये पोन्नागः, अशोकः, अरिष्टः, बकुलः, पनसः इत्यादीनां पूजितानां वृक्षाणां वपनं करणीयम्। तेन द्वारा अशुभवृक्षानां दोषनिवारणं भवन्ति।

## दिशापरत्वेन वृक्षारोपणविचारः

बृहत्संहितायां दिशानुसारेण वृक्षारोपणे शुभाशुभफलसहितं वर्णनं दृश्यते। यथा-

**याम्यादिष्वशुभफला जातास्तरवः प्रदक्षिणेनैते।**
**उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्थाः॥**[१०]

अर्थात् उदिचि अश्वत्थवृक्षः अशुभः भवति, दक्षिणदिशायां प्लक्षः अशुभः भवति, वारूण्यां वटवृक्षः अशुभः भवति तथा सौम्याम् औदुम्बरवृक्षः अप्रशस्तः भवति। परन्तु तासां विपरीतदिशायां ते वृक्षाः प्रशस्ताः भवन्ति। यथा- प्राच्यां वटवृक्षः शुभः भवति, याम्याम् औदुम्बरः शुभः भवति, प्रतिच्यां अश्वत्थवृक्षः शुभः भवति एवमुत्तरदिशायां प्लक्षवृक्षः प्रशस्तः मन्यते। यथोक्तं बृहद्वास्तुमालायामपि वर्णनं प्राप्यते। यथा -

**सौम्यादेः शुभदौ कपित्थकवटावौदुम्बराश्वत्थकौ।**[११]

---

[९] बृहत्संहिता ( अच्युतानन्द झा), अ.५६.८६-८७

[१०] बृहत्संहिता ( अच्युतानन्द झा), अ.५६.८५

[११] बृहद्वास्तुमाला, श्लो.११ पृ-११३

अर्थात् गृहस्योत्तरे कपिथकः, पूर्वदिशायां वटः, दक्षिणे औदुम्बरः च पश्चिमे अश्वत्थवृक्षः शुभदाः मन्यन्ते। गर्गाचार्य अपि यथोक्तं निर्दिशति -

**वर्जयेत् पूर्वतोऽश्वत्थं प्लक्षं दक्षिणस्तथा।**
**न्यग्रोधं पश्चिमे भागे उत्तरे चाप्युदुम्बरम्॥**
**अश्वत्थे तु भयं ब्रूयात् प्लक्षे ब्रूयात्पराभवम्।**
**न्यग्रोधे राजतः पीडा नेत्रामयमुदुम्बरे॥**
**वटः पुरस्ताद्वन्यः स्याद्दक्षिणे चाप्युदुम्बरम्।**
**अश्वत्थः पश्चिमे बगे प्लक्षस्तूत्तरतो भवेत्॥**[१२]

अन्येषानाचार्याणां मतानुसारेणपि निम्नदर्शितरूपेण दिग्विभागे वृक्षारोपणं करणीयम्। यथा - ईशाने धात्री, नैऋत्ये चिञ्चिणी, आग्नेय्यां दाडिमं, वायव्ये बिल्ववृक्षः तन्मध्ये विविधप्रकाराणाम् आम्रवृक्षाणां वपनं करणीयम्। याम्यनैऋत्ययोर्मध्ये जम्बुकगम्बकौ, शम्भुपूर्वयोः मध्ये पनसः आम्रश्च प्रशस्ताः वर्तन्ते। वाटिकायाः बहिः पूर्वे रोपयेद्वंशवृक्षः, सौम्ये शमीः, पश्चिमे खदिरः दक्षिणे च बकुलो अरिष्टनाशाय वपयेत् इति।[१३]

वटिकासु प्रथमवाटिका आम्रवृक्षाणां, द्वितीया अश्वत्थावृक्षाणां, तृतीया वटवृक्षाणां च चतुर्थी प्लक्षवाटिका, पञ्चमी निम्बवृक्षाणां, षष्ठी जम्बुकवाटिका, च सप्तमी चिञ्चणीवृक्षसम्भूता एताः वाटिकाः परिकीर्तिता। एतासां वाटिकानाञ्च आम्रवाटिकाः प्रशस्ता मन्यते।[१४]

## वृक्षारोपणमुहूर्ताः

**लतागुल्मवृक्षरोपणे हस्तपुष्याश्विनीध्रुवैः।**
**विशाखा-मृग मूलाह्व वारूणैश्च प्रशस्यते॥**
**गुरौ केन्द्रे शुभे शुक्रे विधौ वारिणि वोदये।**
**शुभयुक्तेक्षिते बन्धे सद्वारे वा शुभोदये॥**[१५]

यथा हस्तः, पुष्यः, अश्विनी, रोहिणी, विशाखा, मृगशीर्षः, मूलं, शतभिषा तथा ध्रुवनक्षत्राणि (रोहिणी, उत्तराफाल्गुनी, उत्तराषाढा, उत्तराभाद्रपदम्) इत्यादीनां नक्षत्राणां तथा गुरौ केन्द्रे, शुद्धिः

---

[१२] बृहद्वारस्तुमाला (टिप्पणी), पृ-११४

[१३] बृहद्वास्तुमाला, श्लो. २४-२८, पृ-११६-११७

[१४] बृहद्वास्तुमाला, श्लो. २९-३०, पृ-११७

[१५] बृहद्वास्तुमाला, श्लो. ४२-४३, पृ-११९

शुभस्थाने, चन्द्रः जलराश्यां वा जलचरलग्ने, चतुर्थस्थानं शुभग्रहयुक्तमेवं शुभग्रहाणां दृष्टया तथा शुभवासरे लता-गुल्म-वृक्षादीनां रोपणं प्रशस्तं भवति।

बृहस्पतिमतानुसारमपि सोमवासरयुते मूलनक्षत्रे च धनलग्ने वृक्षारोपणं शुभं भवति। द्वितीययोगः- गुरूवासरे, रेवतीनक्षत्रे, जीवलग्ने वृक्षारोपणं शुभं भवति इति।

## वाटिकारोपणमाहात्म्यम्

**वाटिका वा तडागो वा कूपो वा यदि निर्मितः।**
**गृहात्पूर्वे कुबेर्यां च वारूणे शम्भुकोणके॥**
**सदा सवित्री भविता सदा दानं प्रयच्छति।**
**सदा यज्ञं स पूज्येत यो रोपयति पादपम्॥**[१६]

गृहात्पूर्वदिशि, पश्चिमे, उत्तरे वा ईशानकोणे वाटिकानिर्माणं यः करोति सः सर्वदा गायत्रीपुरश्चरणस्य पुण्यफलं प्राप्नोति तथा वृक्षारोपणेऽपि महत् पुण्यफलं प्राप्यते अथ च सदैव दानं करोति एवं सर्वदा यज्ञं पूजनं समानफलं प्राप्यते इति। अश्वत्थमेकं, एकं नीम्बुकं, न्यग्रोधमेकं, दशचिञ्चिणीकानि, त्रीणि कपित्थबिल्वामलकानि, पञ्च आम्राणि इत्यादीनां वृक्षारोपणात् सर्वस्य प्राप्तिः भवति सः नरः पुण्यात्मा अस्ति, अतः सः नरः नरकं न पश्येत् इति बृहद्वास्तुमालायां ग्रन्थकारः दर्शयति।[१७] तथा वराहमिहिराचार्य अपि वृक्षारोपणस्य महत्त्वं दर्शनार्थं कथयति यत् – यो वाटिका कूपसहितं राजमार्गस्य समीपे निर्मापयति सः मनुष्यः चतुर्युगपर्यन्तं स्वर्गे वासं कृत्वा सर्वसुखानामुपभोगं करोति इति।[१८]

## उपसंहारः

नगरे-ग्रामे-पुरे पौरानामनुरञ्जनार्थं वाटिका स्थाप्यते। वाटिका-उद्याननिर्माणे नगरजनानां मनोरञ्जनं भवति तेन सह नगरे-ग्रामे-पुरे पर्यावरणलाभः अपि भवति। उद्याने वृक्षारोपणे पर्यावरणं, वातवरणं च शुद्धं भवति। सम्प्रतिकाले पर्यावरणीय समस्या अतीव-जटिला अस्ति। वातावरणं वायुः च रासायणिकोद्यागानां काराणात् अशुद्धं भवति। तस्य दोषनिवारणार्थम् अधिकाधिकवृक्षाणां रोपणं करणीयम्। तेन वातावरणं, पर्यावरणं, वायुश्च शुद्धा भवन्ति। अतः वाटिकानिर्माणे बालयुवकवृद्धजनानां

[१६] बृहद्वास्तुमाला, श्लो. १६-१५, पृ-११५

[१७] बृहद्वास्तुमाला, श्लो. २२, पृ-११६

[१८] बृहद्वास्तुमाला, श्लो. ३३, पृ-११७

मनोरंजनं भवति तेन सह तत्र पर्यावरणीयसमस्याया अपि किञ्चित् दोषनिवारणं भवति। आधुनिककाले अपि निवाससंकुल (सोसायटी) इति स्थलोपरि तन्मध्ये सार्वजनिकस्थले (कॉमनप्लोट) वाटिकायाः निर्माणम् आवश्यकरूपेण कर्तव्यम्। सम्प्रति निवाससंकुलमध्ये वाटिकायाः निर्माणमावश्यकमस्ति इति सर्वकारनगरपालिकयोः नियमाः अपि वर्तन्ते। नगर-ग्राम-पुर-सोसायटी इत्यादिषु स्थलेषु वाटिकानिर्माणे एतेषां स्थलानामङ्करणं भवति, सुन्दरतयां वृद्धिः भवति तथा जनानां मनोरञ्जनं भवति एवं वातवरणस्य शुद्धिमपि भवति। अतः आधुनिककालेऽपि पर्यावरणदृष्टया जनानां मनोरञ्जनदृष्ट्या च वाटिकायाः महत्त्वमतीव वर्तते।

## सन्दर्भग्रन्थाः

१. समराङ्गणसूत्रधारः, रचयिता - राजा भोजदेवः, सम्पादकानुवादकौ - डॉ. श्रीकृष्ण जुगनू, प्रो. भँवरलाल शर्मा, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, प्रथम संस्करण, ई.स.२०११।

२. बृहद्वास्तुमाला, सम्पादकः - डॉ.ब्रह्मान्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, ई.स.२००७

३. राजवल्लभवास्तुशास्त्रम्, रचयिता - सूत्रधारमण्डन, परिमल पब्लिकेशन, दिल्ली, प्रथम संस्करण-२००५

४. बृहत्संहिता, रचयिता - वराहमिहिराचार्यः, व्याख्याकारः - श्री अच्युतानन्दझाः, चौखम्बा विद्याभवन, वाराणसी, ई.स.२००७